3 स्वादिष्टम् आम्रम्

0124CH03

एहि पठाम

© NCERT not to be republished





एहि वार्तालापं करवाम

क. चित्रे विद्यमान-पक्षिणः अभिजानातु।

ख. आरम्भे कति पशवः पक्षिणः वा आम्रं खादन्ति स्म ?

ग. प्रतिपर्यायं कति पशवः पक्षिणः वा सम्मिलिताः अभवन् ?

घ. एकतः(1) एकः (1) अधिकः भवति चेत् कति? द्वाभ्याम् (2) एकः(1) अधिकः चेत् कति? । एवमेव नव (9) पर्यन्तम् अभ्यासं कुर्वन्तु ।

ङ. कति पशवः पक्षिणः च अन्ते आम्रम् अखादन् ?

यथा पक्षिणः सम्मिलिताः अभवन् तेन क्रमेण संख्यागणनायाः विषये चर्चां कुर्वन्तु। शिक्षकः कथायाः अभिनयं कारयतु, सर्वे बालकाः विभिन्नानां पशूनां पक्षिणां वा ध्वनिं कुर्वन्तः भूमिकां निर्वहन्ति । विभिन्नपक्षिणां पशूनां, तेषां ध्वनीनां निवासस्थानादीनां च विषये वार्तां करोतु ।

© NCERT not to be republished

पक्षिणां संख्याम् अङ्गुलीनां सङ्ख्यया सह मेलयन्तु ।



© NCERT not to be republished

अङ्गुलीनां संख्याम् समुचित-बिन्दुसङ्ख्यया सह मेलयन्तु (भवतां कृते एकं पूर्वमेव कृतम् अस्ति)।



एहि क्रीडाम - अङ्गुलीभिः मूक-अभिनयम्

स्वमित्राय अङ्गुलीत्रयं दर्शयतु। भवतः मित्रमपि विभिन्नप्रकारेण अङ्गुलीत्रयं दर्शयति। यथा अङ्गुलीद्वयम् एकस्य हस्तस्य, एका अङ्गुली अन्यहस्तस्य। एवमेव अन्यसङ्ख्याभिः अपि क्रीडितुं शक्यते ।

एकहस्तस्य उपयोगेन 4 अङ्गुल्यः दर्शयितुं के के मार्गाः सन्ति ? इति दर्शयतु।

© NCERT not to be republished

एहि बहिः क्रीडाम

सर्वेऽपि बालाः गीतं गायन्तः परस्परं हस्तग्रहणं कृत्वा वर्तुलरूपेण भ्रमन्ति । तेषु अध्यापकेन सूचितः कश्चन बालकः करताडनं कृत्वा चत्वारः इति वदति। सर्वे बालकाः परस्परं हस्तग्रहणेन चतुर्णां बालकानां समूहं निर्मान्ति। समूहात् बहिः त्यक्ताः बालकाः प्रत्येकस्मिन् समूहे विद्यमानानां बालकानां संख्यां गणयन्ति। एवमेव बालकाः क्रमशः विभिन्नाः सङ्ख्याः वदन्तः नव-संख्या-पर्यन्तम् इमां क्रीडां प्रवर्तयन्ति।

© NCERT not to be republished

मम चित्रकलादिवसः

राष्ट्रिय-*एकता-दिवसं* (३१ अक्टोबर्) पुरस्कृत्य बालकानां कृते चित्रकलास्पर्धा आयोजिता। चित्रे प्रदर्शितरीत्या रेखां विधाय प्रत्येकं बालकाय विभिन्नानि वस्तूनि उपलब्धानि कारयन्तु।

बालकानां कृते पर्याप्त-सामग्री विद्यते वा नवा इति ज्ञातुं गणनायां साहाय्यं करोतु। अधिकं न्यूनं समानं वा ✓ इति चिह्नेन सूचयतु।

वस्तूनि	बालकानां संख्यायाः अधिकम्	बालकानां संख्यायाः न्यूनम्	बालकानां संख्यया समानम्
			
			
			
			

कानि वस्तूनि न्यूनानि, अधिकानि, समानानि वा सन्ति इति ते कथं ज्ञातवन्तः इति बालकैः सह चर्चां करोतु। यदा वस्तुभ्यः बालकाः अधिकाः भवन्ति तदा समूहे वस्तु-संविभजन-अभ्यासस्य विषये अपि चर्चां करोतु । *एकता-दिवसस्य* महत्त्व-विषये अपि चर्चां करोतु।

© NCERT not to be republished

एहि करवाम

क. यस्य संख्या अधिका अस्ति तत्र ✓ चिह्नं कुर्वन्तु।





ख. यस्य संख्या न्यूना अस्ति तत्र ✓ चिह्नं कुर्वन्तु।



ग. यस्य संख्या न्यूना अस्ति तत्र ✓ चिह्नं कुर्वन्तु।



एहि क्रीडाम - अङ्गुली क्रीडा

क. एतां क्रीडां मित्रेण सह क्रीडन्तु। काश्चन अङ्गुल्यः दर्शयतु यथा 4 अङ्गुल्यः। भवतः मित्रेण चतसृणाम् (4) अपेक्षया न्यूनाः अङ्गुल्यः दर्शनीयाः।

ख. अङ्गुल्या प्रदर्शितायाः संख्यायाः अपेक्षया अधिकां संख्यां दर्शयितुं भवतः मित्रं वदन्तु। एवमेव अन्येन प्रकारेण अधिकां संख्यां, न्यूनसंख्यां च दर्शयितुं भवतः मित्रं वदन्तु।

© NCERT not to be republished

एहि संख्याः 1, 2, 3, ... लिखाम!

चित्राणि पश्यन्तु, निर्देशान् च अनुसरन्तु ।

क. चित्रे प्रदर्शितवस्तुषु यद् वस्तु एकमेव दृश्यते तत् परितः △ चिह्नं निर्मान्तु अधः पेटिकायां च 1 लिखन्तु ।

1 एकम्

ख. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां द्वे एव स्तः, ते परितः ○ चिह्नं निर्मान्तु अधः पेटिकायां च 2 लिखन्तु ।

2 द्वे

ग. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां त्रीणि एव सन्ति, तानि परितः ▭ चिह्नं निर्मान्तु अधः पेटिकायां च 3 लिखन्तु ।

3 त्रीणि

© NCERT not to be republished

घ. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां चत्वारि एव सन्ति, तानि परितः △ चिह्नं निर्मान्तु अधः पेटिकायां च 4 लिखन्तु ।

4 चत्वारि	4	4	4	4	4					

ङ. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां पञ्च एव सन्ति, तानि परितः ○ चिह्नं निर्मान्तु अधः पेटिकायां च 5 लिखन्तु ।

5 पञ्च	5	5	5	5	5					

च. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां षड् एव सन्ति, तानि परितः ▭ चिह्नं निर्मान्तु अधः पेटिकायां च 6 लिखन्तु ।

6 षड्	6	6	6	6	6					

© NCERT not to be republished

छ. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां सप्त एव सन्ति, तानि परितः △ चिह्नं निर्मान्तु अधः पेटिकायां च 7 लिखन्तु ।

ज. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां अष्ट एव सन्ति, तानि परितः ○ चिह्नं निर्मान्तु अधः पेटिकायां च 8 लिखन्तु । E.



झ. चित्रे प्रदर्शितवस्तुषु यानि वस्तूनि संख्यायां नव एव सन्ति, तानि परितः ▭ चिह्नं निर्मान्तु अधः पेटिकायां च नव लिखन्तु ।



वस्तुगणनार्थं, सैकते संख्यालेखनार्थं च बालकान् प्रोत्साहयन्तु। एकं बालकम् अन्यस्य बालकस्य पृष्ठे संख्यां लेखितुं वदन्तु। का संख्या लिखिता इति बालकः ऊहां करोति। उपरि दत्ते चित्रे सप्ततारकमण्डलम् प्रदर्शितम्, तत् प्रतिरात्रम् आकाशे दृश्यते। तत् सप्तर्षिः इति नाम्ना प्रसिद्धम् अस्ति।

© NCERT not to be republished

गणयतु, मेलयतु।

	3
	7
	5

गणयतु, रञ्जयतु।

क. अष्ट तारकान् रञ्जयन्तु।

ख. पञ्च पुष्पाणि रञ्जयन्तु।



ग. षड् कन्दुकान् रञ्जयन्तु।



© NCERT not to be republished

क्रमानुसारं संख्याः योजयन्तु ।

क. एकतः नवसङ्ख्यापर्यन्तं मार्गं शुद्धक्रमेण रेखया योजयतु। रेखाः परस्परं न लङ्घयेयुः।

i.



ii.

1	3	4
9	2	5
8	7	6

iii.

5	6	7
4	3	8
1	2	9

ख. एकः चञ्चलः वानरः संख्यापत्राणि विस्थापितवान्। तान् लघुतमात् बृहत्तमपर्यन्तं सम्यक् क्रमेण लिखतु।



© NCERT not to be republished

ग. बिडालः कार्यपत्रके सर्वत्र भ्रान्तः। लुप्तसङ्ख्याः लिखन्तु ।

___, 5, 6, ___, 8

___, 2, ___, 4, 5

5, ___, ___, ___, 9

3, ___, ___, 6, ___

बृहत्तमां संख्यां रज्यन्तु



© NCERT not to be republished

क. कति पेटिकाः **पीताः** सन्ति ? गणयित्वा तासां संख्यां लिखन्तु।



ख. दत्तचित्रे कति *जम्बूफलानि* सन्ति ?

ग. चित्रे दर्शितानां मेषाणां संख्यां लिखन्तु।

© NCERT not to be republished

घ. केषाञ्चन चतुर्णां फलानां चित्राणि निर्मान्तु।

ङ. कयो: द्वयोः समूहयोः मेलनेन अष्ट फलानि भवन्ति? तौ समूहौ वर्तुलीकरोतु।



च. कयो: द्वयोः समूहयोः मेलनेन सप्त छत्राणि भवन्ति? तौ समूहौ वर्तुलीकरोतु।

छ. केषां संख्या न्यूना अस्ति ? चषकाः चमसा: वा ? संख्यया न्यूनान् वर्तुलीकरोतु।



परियोजनाकार्यम्

एकतः नवपर्यन्तं संख्यापत्राणि निर्मातुं बालकान् वदन्तु। ते विभिन्नवर्ण-कर्गदानाम् उपयोगं कर्तुं शक्नुवन्ति। ते संख्यापत्रे समानसङ्ख्यायाः वस्तूनि संश्लेषयितुं (Stick) चित्रितुं वा शक्नुवन्ति ।

© NCERT not to be republished